
# औपपातिकोपनिषद्



# सागारोवउत्ते सिज्झिहिइ

परमपूजनीयश्रीस्थविरभगवत्प्रणीत-

श्रीऔपपातिकसूत्रस्य

सारसञ्चयरूपा

# औपपातिकोपनिषद्

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरीश्वराः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળ ગ્રંથ : **ઔપપાતિકસૂત્ર**

ભાષા : **અર્ધમાગધી**

ગ્રંથાગ્ર : **૧૬૦૦**

મૂળ ગ્રંથકાર : પરમપૂજનીય **શ્રીસ્થવિર ભગવંત**

સારસંચય : **ઔપપાતિકોપનિષદ્**

ભાષા : **સંસ્કૃત**

સંચય + સંપાદન : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.શ્રી **હેમચંદ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય પ.પૂ.આ.શ્રી **કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

પઠન-પાઠનાધિકારી : **ગુરુ અનુજ્ઞાત શ્રમણ ભગવંતો**

વિ. સં. ૨૦૬૮ • વી. સં. ૨૫૩૮ • સને ૨૦૧૨

પ્રથમ આવૃત્તિ, પ્રતિ : ૫૦૦

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

णमोत्थु णं समणस्स भगवओ महावीरस्स

श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

ઉત્પત્તિ
અને વિનાશ
ગૌણ બની જાય.

અને ધ્રુવ
મુખ્ય બની જાય.

એના માટે જ
થઈ છે
આ ઉત્પત્તિ
ચાલો,
સફળ કરીએ.

- આ. કલ્યાણબોધિસૂરિ

अथ

# औपपातिकोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं कथये रहस्यं
जिनेश्वरोक्तं ह्युपपातसत्कम्॥

तस्मिन् काले तस्मिन् समय ऋद्ध-त्वादिविशिष्टा चम्पानगर्यभवत्। तदीशा-नभागे चिरादिकत्वादिविशिष्टं पूर्णभद्र-चैत्यम्। तच्च कृष्णत्वादिविशिष्टवनषण्डेन

समन्तात् परिक्षिप्तम्। तत्र च नित्यकुसुमितत्वादिविशिष्टाः पादपाः। तन्मध्य एको महानशोकवरपादपः। तस्य परितोऽपि तिलकवृक्षादयः पद्मलतादिभिः सम्परिक्षिप्ताः।

तस्याशोकवृक्षस्याधस्तान्मनाक् स्कन्धासन्न एको महान् विष्कम्भायामोत्सेधसुप्रमाणोऽञ्जनादिवत्कृष्णः स्निग्धघनोऽष्टकोणो वृकादिभक्तिचित्र आदर्शतलोपमोनवनीततूलस्पर्शः सिंहासनसंस्थितो दर्शनीयः पृथ्वीशिलापट्टकः।

तत्र चम्पानगर्यां कूणिको राजा शक्राद्युपमत्वादिविशिष्टः। शत्रुदुर्भिक्षादिरहितराज्यस्य तेन पालनम्। तस्य सुकुमारपाणिपादत्वादिगुणोपेता धारिणी देवी।

कोणिकस्यैकः पुरुषो विहितप्रभूतजीविको तद्दैवसिकीभगवद्वार्त्तानिवेदकः। तस्याप्यन्ये बहुपुरुषा दत्तभृतिवेतनास्तद्दैवसिकभगवत्प्रवृत्तिनिवेदकाः।

तत्कालसमययोरादिकरत्वादिविशिष्टः श्रमणभगवन्महावीरः ३४ बुद्धातिशय- ३५ सत्यवचनातिशय-८ प्रातिहार्य - श्रमण-

श्रमणीवृन्दपरिकरितः पूर्वानुपूर्व्या चरन् ग्रामानुग्रामं द्रवन् सुखेन विहरन् चम्पानगर्यां पूर्णभद्रचैत्यं समवसर्त्तुं चम्पानगर्या बहि-रुपनगरग्राममुपागतः।

नियुक्तपुरुषस्यैतदवगमः। हर्षादिपुरस्सरं कोणिकस्य तन्निवेदनम्, यथा- यस्य दर्शनं देवानुप्रिया अभिलषन्ति, यस्य च नामगोत्रश्रवणेनापि च हृष्टतुष्टा भवन्ति, स श्रमणभगवन्महावीरश्चम्पायां पूर्णभद्रचैत्ये समवसर्त्तुं चम्पाया उपनगरग्राममुपागतः, तदेतद् देवानुप्रियाणां प्रियार्थं प्रियं निवेद-

यामि, ते प्रियं भवतु - इति।

एतच्छ्रुत्वा कोणिकस्य हर्षातिशयः, सिंहासनादभ्युत्थानम्, पादपीठात्प्रत्यवतर-णम्, पादुकामोचनम्, पञ्चराजचिह्नत्यागः, जिनाभिमुखं सप्ताष्टपदानुगमनम्, शक्रस्त-वभणनं च।

तत्पुरुषस्याष्टोत्तरशतसहस्रमानप्रीतिदानम्, सत्कारादि कृत्वा भगवदागमने निवेदना-यादेशकरणम्। द्वितीयदिने भगवतश्चम्पान-गर्याः पूर्णभद्रचैत्य आगमनम्, यथाप्रति-रूपमवग्रहमवगृह्य संयमेन तपसाऽऽत्मानं

भावयता विहरणं च।

भगवतो बहवोऽन्तेवासिनो राजकुलादितः प्रव्रजिताः। उत्तमरूपलावण्यविज्ञानविक्रमसौभाग्यकान्तियुता बहुधनधान्यादिसम्पन्ना राजगुणातिरेका इष्टभोगाः सुखसम्प्रललिता विषयसुखं किम्पाकफलोपमं ज्ञात्वा, जीवितं च जलबुद्बुदनिभं कुशाग्रजलबिन्दुचञ्चलं च ज्ञात्वा, पटाग्रलग्नं रज इव हिरण्यादि त्यक्त्वा प्रव्रजिताः। ते चैकेऽर्धमासपर्याया यावदनेकवर्षपर्यायाः। तैः संयमेन तपसाऽऽत्मानं भावयद्भिर्विहरणम्।

तेषु केचिदाभिनिबोधिकज्ञानिनो यावत् केवलज्ञानिनः, केचिन्मनःप्रभृति-बलिनः, केचिन्मनःप्रभृतिभिः शापानुग्रह-समर्थाः, केचिच्छ्लेष्मौषधिप्रभृतिलब्धि-सम्पन्नाः, केचित्तु चारणा विद्याधरा आकाशातिपातिनः। केचित् कनकावलि - क्षुल्लकसिंहनिष्क्रीडितमहत्सिंहनिष्क्रीडित-भद्रादिप्रतिमा - आचाम्लवर्धमानतपांसि प्रतिपन्नाः। केचिन्मासिकादिप्रतिमाः प्रति-पन्नाः।

भगवतोऽन्तेवासिनो बहवः स्थविरा

जात्यादिगुणसम्पन्नाः, जितक्रोधत्वादि-विशिष्टाः, व्रतगुणादिप्रधानाः, अबहिर्लेश्याः, सुश्रामण्यरताः, दान्ताश्च। इदमेव निर्ग्रन्थ प्रवचनं पुरतः कृत्वा तेषां विहरणम्। ते चात्मवाद-परवादविज्ञाः, रत्नकरण्डक-समानाः, कुत्रिकापणभूताः, परवादि-प्रमर्दनाः, द्वादशाङ्गधराः, समस्तगणि-पिटकधराः, सर्वाक्षरसन्निपातिनः, सर्व-भाषानुगामिनः, अजिना जिनसङ्काशाः, जिना इवावितथं व्याकुर्वाणाश्च। तेषां संयमेन तपसाऽऽत्मानं भावयतां विहरणम्।

भगवतोऽन्तेवासिनो बहवोऽनगारा अष्टसमितियुताः, गुप्ताः, गुप्तेन्द्रियाः, गुप्त-ब्रह्मचारिणः, अममाः, अकिञ्चनाः, छिन्नस्रोतसः, निरुपलेपाः, कांस्यपात्र्यादीनामिव निर्लेपत्वादिगुणसम्पन्नाः, द्रव्यादि-प्रतिबन्धशून्याः, वर्षावासवर्जं ग्राम एक-रात्रिका नगरे च पञ्चरात्रिकाः, वासीचन्दन-समानकल्पाः, समलेष्टुकाञ्चनाः, समसुख-दुःखाः, इहलोकपरलोकाप्रतिबद्धाः, संसारपारगामिनः, कर्मनिर्घातनार्थमभ्युत्थिताश्च।

तेषां च षड्विधं बाह्यं तपोविधानम्, आभ्यन्तरं च षड्विधम्। तद्यथा- अनशनादि, प्रायश्चित्तादि च। (एतत्प्रभेदादयो भगवतीवन्नेयाः)।

भगवतो बहवोऽनगारा आचारधरा यावद् विपाकश्रुतधरास्तत्र तत्र देशे गच्छ-गुल्म-स्पर्धकेषु विभक्ता वाचनादिपरायणाः, एके तूर्ध्वजान्वधोशिरसो ध्यानकोष्ठोपगताः।

ते च महाभयङ्करसंसारसागरादत्यन्तं भीततया संयमपोतेन सम्यक् तत्तरण-

प्रवृत्ताः, जितेन्द्रियाः, निर्भयाः, संयताः, विरताः, मुक्ताः, निःस्पृहाश्च।

तत्कालसमययोर्भगवदन्तिके बहवो भवनपति-वानमन्तर-ज्योतिष्क-वैमानिक-देवदेवीनां प्रादुर्भावः, भगवत्प्रदक्षिणा, वन्दनादि कृत्वा भगवतोऽनत्यासन्नानतिदूरे शुश्रूषा-नमस्कारपुरस्सरमभिमुखानां विनयेन प्राञ्जलिपुटानां तेषां पर्युपासना।

चम्पानगर्यां शृङ्गारकादौ भगवदागमनादिगोचरो लोककोलाहलः, मिथो तद्भणनञ्च, यथा-महाफलं तथारूपाऽर्ह-

द्भगवतां नामगोत्रश्रवणमपि, किम्पुनरभि-
गमन-वन्दन-नमस्कार-प्रतिपृच्छा-पर्युपा-
सनाः ? एकमप्यार्य-धार्मिक-सुवचन-
श्रवणम् ? किम्पुनर्विपुलस्यार्थस्य ग्रहणम् ?
तद्गच्छामो देवानुप्रियाः ! श्रमणं भगवन्तं
महावीरं वन्दामहे नमस्यामः सत्कारयामः
सम्मानयामः कल्याणं मङ्गलं दैवतं
चैत्यमिव पर्युपासयामः। एतदस्माकमि-
हभवे प्रेत्य च हिताय, सुखाय, क्षमाय,
निःश्रेयसाय, आनुगामिकत्वाय च भवि-
ष्यति - इति।

ततो राजन्यादीनां वन्दनाद्यर्थं कुतूहलाद्यर्थं पृच्छाद्यर्थं सर्वविरति-देशविरत्यर्थं जिनभक्तिरागेण जीतमेतदिति वा कृत्वा तुरगगजादिगतानां भगवदन्तिके गमनम्, छत्रादिदर्शने यानत्यागः, उपागमनम्, प्रदक्षिणा, वन्दनादि कृत्वा पर्युपासना च।

नियुक्तपुरुषेण कोणिकराज्ञस्तन्निवेदनम्, अर्धत्रयोदशलक्षमानं प्रीतिदानम्, आभिषेक्यहस्ति-चतुरङ्गसेना-सुभद्रादि-देवी-यानसज्जीकारापणम्, चम्पानगर्यामुत्सवकारापणम्, कोणिकराज्ञो व्यायाम-

शालागमनम्, अभ्यङ्गकारापणम्, मज्ज-नम्, अलङ्कारधारणम्, तारामध्ये शशीव शोभमानस्य गणनायकादिपरिवृतस्या-भिषेक्यहस्तिरत्नाऽऽरोहणम्।

तत्पुरतोऽष्टमङ्गल-भृङ्गार-छत्र-पताका-चामर-ध्वज-सिंहासन-चतुरङ्ग-सेनासम्प्रस्थानम्, वैश्रमणवदद्भुतैश्वर्यस्य कोणिकराज्ञश्चतुरङ्गसेनया समनुगम्यमान-मार्गस्य पूर्णभद्रचैत्यं प्रति प्रस्थानम्।

सर्वर्द्ध्या गच्छतस्तस्य द्रव्यार्थि-प्रभृतिभिर्जयकारकरणम्। नयनमालासहस्रैः

प्रेक्ष्यमाण इत्यादिः (श्रीकल्पसूत्रवर्णकः) कोणिकमाश्रित्याप्यत्र ज्ञेयः। भगवतश्छत्रादि-दर्शने तस्य हस्तिनः प्रत्यवतरणम्, राजचिह्नत्यागः, पञ्चाभिगमग्रहः, प्रदक्षिणा वन्दनादि कृत्वा कायप्रभृतिभिः पर्युपासना च।

कायिकी पर्युपासना - सङ्कोचिताग्रहस्तपादः शुश्रूषानमस्कारपरोऽभिमुखो विनयेन प्राञ्जलिपुटः पर्युपास्ते। वाचिकी - यद्यद् भगवान् कथयति तत्तदाश्रित्य 'एवमेतद् भदन्त ! तथैतद् भदन्त !' इत्यादि

भणति। मानसिकी - महत्संवेगं जनयित्वा तीव्रधर्मानुरागरक्तः पर्युपास्ते।

कोणिक-देवी-ऋषिपर्षत् - मुनिपर्षत्-यतिपर्षत्-देवपर्षत्-अनेकशतवृन्देभ्योऽपरिमितबलवीर्यतेजोमाहात्म्यकान्तियुतस्य शारदनवस्तनितमधुरगम्भीरक्रौञ्चनिर्घोषदुन्दुभिस्वरस्य भगवतः देशनाकरणम्। सा च भगवतः सरस्वती उरसि विस्तृता, कण्ठेऽवस्थिता, शिरसि च समाकीर्णा, सुविभक्ताक्षरा, अमन्मना सर्वाक्षरसन्निपातिनी, स्वरकलाभिः पूर्णा, गेयरागानुरक्ता च।

स्वरोऽपि भगवतो योजनातिक्रामी, भाषा चार्धमागधी, तस्याश्च तेषां सर्वेषामार्यानार्याणां स्वस्वभाषायां परिणमनम्।

भगवद्देशना - अस्ति लोकः, अस्त्यलोकः, एवं जीवाः, अजीवाः, बन्धः, मोक्षः, पुण्यम्, पापम् इत्यादि। सर्वमस्तिभावस्यास्तित्वेनेतरस्येतरत्वेन भणनम्। तथा - सुचीर्णानि कर्माणि सुचीर्णफलानि भवन्ति, दुश्चीर्णानि तु दुश्चीर्णफलानि। बध्नाति जीवः शुभाशुभं कर्म सुचरितेतरक्रियाभिः। प्रत्याजायन्ते

जीवाः। सफले कल्याणपापके। इदमेव निर्ग्रन्थं प्रवचनं सत्यमनुत्तरमित्यादि च।

| **गतिः** | **उत्पत्तिकारणानि** |
|---|---|
| नरकग० | महारम्भः, महापरिग्रहः, पञ्चेन्द्रियवधः, कुणिमाहारः |
| तिर्यक्० | मायित्वम्, निकृतिः, अलीकवचनम्, वञ्चनम् |
| देवगतिः | सरागसंयमः, संयमासंयमः, अकामनिर्जरा, बालतपः |

| गतिः | उत्पत्तिकारणानि |
| --- | --- |
| मनुष्यग॰ | प्रकृतिभद्रकता,<br>प्रकृतिविनीतता,<br>सानुक्रोशता, अमत्सरिकता |

किञ्च-यथा गम्यते नरके, ये च नरकाः, या च तेषु वेदना, यानि तिर्यग्योनौ शारीरमानसदुःखानि, यथा व्याध्यादिप्रचुरमनित्यं मानुष्यम्, देवा देवलोकास्तदृद्धिसौख्यानि, सिद्धास्तद्वसतिश्च, षट्कायाः, यथा जीवा बध्यन्ते मुच्यन्ते यथा च परिक्लिश्यन्ते, यथा च केचिदप्रतिबद्धा

दुःखानामन्तं कुर्वन्ति, यथा च केचिदार्त्ता दुःखसागरमुपयान्ति, यथा च केचिद् वैराग्यमुपगता विघाटयन्ति कर्मसमुद्गकम्-इत्यपि भगवता कथनम्।

तथा- अगारधर्मानगारधर्मव्याख्या-नमपि, एवं धर्मं श्रुत्वा पर्षदा भगवतः प्रदक्षिणावन्दनादिकरणम्, एकेषां सर्व-विरतिस्वीकारः, एकेषां देशविरति-प्रतिपत्तिः, शेषाणामेवं भणनम्-स्वाख्यातं सुप्रज्ञप्तं सुभाषितं सुविनीतं सुभावित-मनुत्तरं ते भदन्त ! निर्ग्रन्थं प्रवचनम्। धर्ममाचक्षणानां यूयमुपशमं ब्रूथ, तं ब्रुवाणा

च विवेकम्, तं ब्रुवाणा च विरमणम्, तद् ब्रुवाणाश्च पापकर्माकरणम्, नास्ति कश्चि-च्छ्रमणो ब्राह्मणो वा य इदृशं धर्मं वक्तुं समर्थः, किम्पुनरतोऽप्युत्तरतरम् - इति।

पर्षत्प्रतिगमनम्। जातसंशयस्य गौतमस्वामिनो भगवतः प्रदक्षिणादिपुरस्सरं प्रश्नः - असंयताविरताप्रतिहतप्रत्याख्या-तपापकर्म सक्रियासंवृतैकान्तदण्डैकान्त-बालैकान्तसुप्तो जीवो बध्नाति पापकर्म ?

भगवान् - ओम्

गौ० - किं मोहनीयमपि ?

भ० - ओम्।

गौ० - मोहनीयं वेदयन् तद् बध्नाति ?

भ० - ओम्, अन्यत्र चरममोहनीयवेदकात्।

गौ० - असंयतत्वादिविशिष्ट उत्पद्यते नरके ?

भ० - ओम्।

गौ० - स किं देवेषूत्पद्यते ?

भ० - अकामतृष्णादिनाऽऽत्मानं क्लेशयित्वोत्पद्यते वानमन्तरेषु, तत्स्थितिः

- १०,००० वर्षाणि। न ते परलोक-स्याराधकाः।

चारकादिबद्धा छिन्नहस्तादयः शूली-भिन्ना दवाग्निदग्धा गिरिपतिता जल-ज्वलनप्रवेशका विषभक्षितका एवमादयो मनुष्या असङ्क्लिष्ट परिणामा अन्यतर-वानमन्तरेषूत्पद्यन्ते। स्थितिः - १२,००० वर्षाणि। परलोकानाराधकाः।

प्रकृतिभद्रकोपशान्ताल्पकषाया मृदु-मार्दवसम्पन्ना गुरुमाश्रिता विनीता माता-पितृशुश्रूषकास्तदनतिक्रम्यवचनाश्च, अ-

ल्पेच्छारम्भपरिग्रहा मनुष्या उत्पद्यन्तेऽन्य-तरवानमन्तरेषु। स्थितिः - १४,००० वर्षाणि। परलोकानाराधकाः।

या चान्तःपुरिका मृतपतिका बाल-विधवादयश्च मात्रादिरक्षिताः प्ररूढनख-केशरोमाः पुष्पालङ्कारादिवर्जिता अस्ना-नादिपरितापिता क्षीरादिशून्याहारा अल्पे-च्छारम्भपरिग्रहा अकामब्रह्मचर्यवासेन नातिक्रमन्ति स्वपतिशय्याम्, ताः स्त्रियो-ऽप्युत्पद्यन्तेऽन्यतरवानमन्तरेषु। स्थितिः - ६४,००० वर्षाणि। परलोकानाराधकाः।

ये मनुष्या जलेन सार्धमेकादि याव-
देकादश द्रव्याण्येवाहारयन्ति, ते गोव्रति-
कादयो नवविकृतिवर्जका वैनयिकादयो-
ऽल्पेच्छा इत्यादि यावत् स्थितिः -
८४,००० वर्षाणि। परलोकानाराधकाः।

ये गङ्गाकूलाश्रिता वानप्रस्था अग्नि-
होत्रिकादय उन्मज्जनादिकृतो हस्तिताप-
सादयः पुष्पाद्याहाराः पञ्चाग्नितापैरात्मान-
मङ्गारपक्वमिव कुर्वाणाः, त उत्कर्षेण
ज्योतिष्केषूत्पद्यन्ते। स्थितिः - वर्षलक्षा-
धिकं पल्यम्। परलोकस्यानाराधकाः।

कान्दर्पिक-कौकुचिक-मौखरिक-गीतरतिप्रिय- नर्त्तनशीला ये श्रमणाः, ते तत्स्थानस्यानालोचितप्रतिक्रान्ता उत्कर्षेण सौधर्मे कान्दर्पिकेषु देवेषूत्पद्यन्ते। स्थितिः - वर्षसहस्राधिकं पल्यम्। परलोकानाराधकाः।

ये शङ्खादिपरिव्राजका दान-शौच-तीर्थाभिषेकप्ररूपकाः, नद्याद्यनवगाहकाः, शकटाद्यारोहण-नाट्यादिप्रेक्षण-ताम्रपात्रादिधारण-धातुरक्तवस्त्रान्यवस्त्रहाराद्यलङ्कारप्रभृतिवर्जकाः, त उत्कर्षेण ब्रह्मलोक उत्पद्यन्ते, स्थितिः - १० सागराः,

परलोकानाराधकाः।

अम्बडपरिव्राजकस्य सप्तशिष्यशतानि ग्रीष्मकाले गङ्गासमीपे जलदातुरप्राप्त्या तृतीयव्रतरक्षणार्थमनशनं प्रतिपद्य श्रीवीरवन्दनादिपूर्वं सर्वप्राणातिपातादि प्रत्याख्याय समाधिना कालं कृत्वा उत्पन्ना ब्रह्मलोके। स्थितिः - १० सागराः। परलोकस्याराधकाः।

काम्पिल्यपुरेऽम्बडपरिव्राजको गृहशत उपैति वसतिम्, प्रकृतिभद्रकत्वादिगुणैः षष्ठतपः सहितातापनाभिश्चोत्पन्नवैक्रियाव-

धिज्ञानलब्धिकत्वात्। न स प्रव्रजितुं समर्थः। स श्रमणोपासकः स्थूलप्राणातिपातादिप्रत्याख्याता, सर्वमैथुनप्रत्याख्याता च। शकटाद्यारोहणनाट्यादिप्रेक्षणताम्रपात्रादिधारणेत्यादिवर्जनं तस्य प्राग्वत्। वर्जयत्यसावाधाकर्मादि दुष्टं भक्ताद्यपि। प्रत्याख्यातोऽस्य चतुर्धाऽप्यनर्थदण्डः। कल्पतेऽस्य मागधार्धाढकजलं प्रतिगृहीतुम्, तदपि दत्तं वहमानं पूतं च, सावद्यमिति कृत्वा, तदपि दन्तादिप्रक्षालनार्थं पातुं वा, न तु स्नातुम्।

कल्पतेऽस्य मागधाढकप्रमाणं जलं वहमानं दत्तमित्यादि प्राग्वत्, तदपि स्नातुम्, न हस्तादिप्रक्षालनार्थं पातुं वा। अर्हत्तच्चैत्यानि मुक्त्वाऽस्य न कल्पतेऽन्ययूथिक-तद्देवता-तत्परिगृहीतचैत्यानि वन्दनादिगोचरीकर्तुम्। स मासिकानशनेन कालं कृत्वोत्पत्स्यते ब्रह्मलोके। स्थितिः - १० सागराः। ततो महाविदेहे समृद्धकुले दृढप्रतिज्ञनामदारकः (एवं राजप्रश्नीयगत-दृढप्रतिज्ञवन्नेयं) यावत् सिद्धिः।

आचार्यादिप्रत्यनीका असद्भावो-

द्भावनाभिरात्मपरोभयव्युद्ग्राहकास्ते श्रमणास्तत्स्थानस्यानालोचितप्रतिक्रान्ताः कालं कृत्वोत्कर्षेण लान्तके देवकिल्बि-षिकतयोत्पद्यन्ते। स्थितिः- १३ सागराः। परलोकस्यानाराधकाः।

जलचरादितिरश्चां समुत्पन्नजाति-स्मरणज्ञानानां स्वयं प्रतिपन्नपञ्चाणुव्रतानां कृतानशनानामालोचितप्रतिक्रान्तानामुत्कर्षेण सहस्रार उत्पादः। स्थितिः - १८ सागराः। परलोकस्याराधकाः।

य आजीविका अभिग्रहविशेषाद्

द्वयादिगृहमतिक्रम्य भिक्षां गृहणन्ति, न निरन्तरमेकान्तरं वा, उत्पलवृन्तानि भैक्षतया गृह्णन्ति, विद्युत्सम्पाते भिक्षां नाटन्ति, तपस्यन्ति चोष्ट्रिकाप्रविष्टाः, तेषामुत्कर्षेणाच्युत उत्पादः। स्थितिः - २२ सागराः। अनाराधकाः।

ये श्रमणा आत्मोत्कर्षपरपरिवाद-भूतिकर्म - कौतुककारकाः, तेऽनालोचित-प्रतिक्रान्ता उत्कर्षेणाच्युतकल्पे आभियो-गिकदेवेषूत्पद्यन्ते। स्थितिः - २२ सागराः। अनाराधकाः।

बहुरजःप्रभृतिसप्तप्रवचननिह्नवा असद्भावोद्भावनाभिरात्मपरोभयं व्युद्ग्राहयन्त उत्कर्षेणोपरितनग्रैवेयकेषूत्पद्यन्ते, स्थितिः - ३१ सागराः, अनाराधकाः।

येऽप्यल्पारम्भपरिग्रहा मनुष्याः धर्मिष्ठाः सुशीलाः सुव्रताः साध्वन्तिके प्रतिपन्नदेशविरतयो निर्ग्रन्थप्रवचनैकानुरक्ता श्रमणान् प्रासुकानशनादिना प्रतिलाभयन्तोऽनशनपूर्वं कालं कृत्वोत्कर्षेणाच्युत उत्पद्यन्ते। स्थितिः २२ सागराः। आराधकाः।

येऽप्यनारम्भा अपरिग्रहाः प्रतिपन्न-सर्वप्राणातिपातादिविरतयोऽनगारा अष्ट-समितिसमिताः, तेषामेकेषामेतेन विहारेणोत्पद्यते केवलज्ञानम्, यावत् सिध्यन्ति। येषां तु नोत्पद्यते कैवल्यं प्राक्, तेऽनुत्पन्न उत्पन्ने वाऽऽबाधे भक्तःप्रत्याख्यानादि-पुरस्सरं चरमोच्छ्वास-निःश्वासैरुत्पादयन्ति कैवल्यम्, ततः सिध्यन्ति। तदन्ये तु पूर्वकर्मावशेषेणोत्कर्षेण सर्वार्थसिद्धे महा-विमान उत्पद्यन्ते। स्थितिः - ३३ सागराः। आराधकाः।

केवलिनः सर्वाधिकं वेदनीयं कर्म, सर्वस्तोकमायुः कर्म। कर्मचतुष्कं बन्धनैः स्थितिभिश्च समीकरणार्थं केवली समुद्धातं गच्छति। न तु सर्वेऽपि केवलिनः, अनन्तानां केवलिनां तदन्तरेणैव प्राप्त-सिद्धिकत्वात्।

आवर्जीकरणमसौ समुद्धातात् प्राक् करोति, तच्चोदीरणावलिकायां कर्मप्रक्षेप-व्यापाररूपमसङ्ख्येयसमयान्तर्मुहूर्त्तिकम्।

अष्टसमयिकः केवलीसमुद्धातः। तत्राद्यसमये दण्डं करोतीत्यादि। न

समुद्धातगतः सिध्यति, अपि तु ततः प्रतिनिवर्तते, इहागच्छति, मनोवाक्काययोगी भवति। सत्यमनोवाग्योगअसत्यामृषामनोवाग्योगयोगी भवति। काययोगेन गमनागमनादि करोति प्रातिहारिकपीठफलकशय्यासंस्तारकप्रत्यर्पणं वा करोति। ततोऽपि योगनिरोधं कृत्वेषद्ध्रस्वपञ्चाक्षरोच्चारणाध्वासङ्ख्येयसमयिकान्तर्मौहूर्त्तिकं प्रतिपद्यते शैलेषीकरणम्। तत्र च पूर्वरचितश्रेण्यामसङ्ख्यगुणश्रेणिभिरनन्तकर्मांशान् क्षपयित्वा युगपदायुरादिकर्मचतुष्कं क्षपयित्वौदारिकतेजःकार्मणानि

सर्वथाऽपि त्यक्त्वर्जुश्रेणिप्रतिपन्नोऽस्पृश-द्गतिरुर्ध्वमेकसमयेनाविग्रहेण गत्वा साकारोपयुक्तः सिध्यति।

स च तत्र साद्यनन्तः सिद्धो भवति, अशरीरो जीवघनो दर्शनज्ञानोपयुक्तः, कृत-कृत्यश्च। नास्य पुनरागमनम्, दग्धकर्म-बीजत्वात्। सर्वार्थसिद्धमहाविमान-सर्वो-परिभागाद् द्वादशयोजनाबाधयेषत्प्राग्भारा पृथ्वी, ४५ योजनलक्षायामविष्कम्भमाना, १,४२,३०,२४९ योजनानि साधिकानि तत्परिरयः, बहुमध्यभागे तद्बाहल्यं ८ योजनानि, ततः प्रतिहीयन्ती प्रतिहीयन्ती

सर्वचरमपर्यन्तेषु मक्षिकापत्रादपि तनुकतरा बाहल्येनाङ्गुलासङ्ख्येयभागमाना। तस्या इषद्-इत्यादयः १२ नामधेयानि। सा च सर्वार्जुनसुवर्णमयी निर्मला दर्शनीयत्वादि-गुणयुता च।

तस्योपरि योजने लोकान्तः, तद्योजनस्योपरितनगव्यूतस्योपरितनषड्भागे तिष्ठन्ति सिद्धाः। तेषां चरमभवे यत् संस्थानमभूत्, ततस्त्रिभागहीनाऽवगाहना भवति।

सिद्धानामुत्कृष्टाऽवगाहना - ३३३

१/३ धनूंषि। जघन्या-अष्टाङ्गुलाधिकहस्तः। यत्रैकः सिद्धस्तत्रानन्ताः। सर्वेऽपि लोकान्ते स्पृष्टाः। सर्वप्रदेशैस्तेऽनन्तसिद्धस्पृष्टाः। देशप्रदेशैस्ततोऽप्यसङ्ख्यगुणसिद्धस्पृष्टाः। यत् सिद्धानां सौख्यम्, तन्न मनुष्याणां सर्वदेवानां वा। अपि च सर्वाध्वपिण्डितमनन्तगुणमपि देवसुखमनन्तवर्गैरपि मुक्तिसुखं नाप्नोति। यथा म्लेच्छो नगरगुणान् कथयितुं न पारयति, वने तदुपमाभावात्, एवं निरुपमं सिद्धसुखमशक्यं वर्णयितुम्। तथापि- यथा कोऽपि पुरुषः सर्वकामगुणितं भोजनं

भुक्त्वा तृष्णाक्षुधादिविमुक्तोऽमृततृप्तस्ति-ष्ठेत्, तथा सिद्धाः सर्वकालतृप्ता अतुलं निर्वाणमुपगताः सुखं प्राप्ताः सुखिन-स्तिष्ठन्ति, निश्छिन्नसर्वदुःखत्वात्।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) ज्येष्ठसित-द्वितीयायां सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆

(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

(૫) **ત્રિપદીશતકમ્** → મહો. શ્રીયશોવિજયજી કૃત અધ્યાત્મસાર આદિ ગ્રંથો પર પ્રવચનો.

(૬) **પ્રવચનસૂત્રોપનિષદ્** → અષ્ટપ્રવચનમાતા વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૭) **આશાતનોપનિષદ્** → ગુરુ - ૩૩ આશાતના વિષયક નવનિર્મિત સંસ્કૃત પ્રકરણ.

(૮) **તરંગલોલા સમાસ** → પ.પૂ. શ્રીપાદ-લિપ્તાચાર્ય કૃત **તરંગલોલા** કથાનો નવનિર્મિત સંક્ષિપ્ત સંસ્કૃત ગદ્યાનુવાદ.

(૯) **યોગોપનિષદ્** → ૩૨ યોગસંગ્રહ વિષયક નવનિર્મિત સંસ્કૃત કૃતિ.

(૧૦) **સંદર્ભસંચય** → લગભગ ૩૦૦ પુસ્તકોમાંથી પસાર થઈને વીણેલા મોતીઓ.

(૧૧) **અનુભૂતિગીતા** → આનંદઘનની આત્માનુભૂતિ કળશ કાવ્ય સંચય.

DON'T MISS IT

# અણગારનો પ્રાણવાયુ




મૂળકાર

**પ.પૂ.આ. શ્રી રત્નસિંહસૂરિજી મ.સા.**

ટીકાકાર

**બહુશ્રુત મુનિરાજશ્રી રત્નબોધિવિજયજી મ.સા.**

# *Don't Miss it.*




मूलकाराः

महो. श्रीयशोविजय गणिवराः

अनुवादकाराः

आ. श्रीकल्याणबोधिसूरयः

લાભાર્થી

**શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ**

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના

૧૩૨